सप्तमे वा लग्नेशे पापसंयुते। तुर्य्यसप्ताष्टगश्चन्द्रः पापान्तःस्थो मृतिप्रदः। क्षीण एवं लग्नगोऽपि पापे सप्ताष्टगे सति। शुभादृष्टे विधौ भान्ते केन्द्रकोणोपगैः खलैः। मृतिराशु सचन्द्रेऽङ्गे पापैर्वा सप्तमैः स्थितैः। सपापोऽङ्गे विधौ ग्रस्ते समाष्टकाच्छिशोर्वधः। भौमेऽष्टमे रवावेवंविधे लग्ने तु शस्त्रजः। चन्द्रार्कौ वा तनौ पापैः सबलैरष्टकोणगैः। शुभैर्न युक्तदृष्टश्चेन्मरणं बालकस्य हि। लग्नाष्टनवमान्त्येषु कुजचन्द्रार्कसूर्य्यजैः। बलिष्ठगुर्व्वदृष्टैः स्याज्जातस्य मरणं ध्रुवम्। पापयुक्तो विधुर्लग्नसप्तकोणान्त्यमृत्युगः। मरणाय बलिष्ठोच्चस्त्रिकयुग् वीक्षितो न चेत्। योगकृद्बलिष्ठेनाधिष्ठिते च बली विधुः। स्वभे वा लग्नभेऽब्दान्तः पापदृष्टस्तदा मृतिः। मेषालिगो गुरुर्मृत्यौ विशुक्रैरवलोकितः। त्रिवर्षान्मृत्युदोमन्दः स सूर्य्येन्दू नवाब्दतः। दृश्यादृश्ये सौम्यपापैर्लग्नेऽग्नाविषुभिर्मृतिः। बुधः सार्कविधुः पापदृष्ट एकादशाब्दतः। लग्नेशो रिपुगोराशिमितैर्वर्षैर्मृतिप्रदः। मासैर्द्रेक्काणनाथस्तु दिवसैरंशनायकः। लग्ने शनिः षोड़शाहात् पापदृष्टोऽथ संयुतः। मासाद्विशुद्धो वर्षान्तु शिशोर्मृत्युकरः स्मृतः। लग्नेऽर्ककुजमन्दाश्चेत् षष्ठे वा सप्तमे विधुः। क्षीणो न दृष्टो गुरुणा सप्तवर्षान् मृतिप्रदः। राशिलग्नेश्वरावस्तं यातौ षष्ठाष्टरिष्फगौ। राश्यङ्कतुल्यवर्षैस्त मरणाय शिशोः स्मृतौ। राहुःपापेक्षितः केन्द्रसंस्थो मृत्युकरः शिशोः। वत्सरैर्दशभिः कैश्चित् स्मृतः षोड़शवत्सरैः। एकोऽपि पापोमृत्युस्थः शत्रुगेहे खलेक्षितः। अमरार्भकमप्येवं वर्षान्मृत्युवशं नयेत्। शुक्रः कर्कमृगारस्थोव्ययाष्टारिस्थितैः खलैः। सर्वैः प्रदृष्टः षड्वर्षैर्जातस्यारिष्टकारकः। बुधः कर्कस्थितः षष्ठेऽष्टमे वा चन्द्रवीक्षितः। वर्षैश्चतुर्भीरिष्टस्य कारकः कथितो बुधैः। सूर्य्यः कर्म्मणि शन्यारश्चेत्तत्स्थः पापवीक्षितः। मरणाय शिशोः केतूदयभं जन्मभं तथा। षष्ठाष्टमस्थाः शुभदाश्च पापाधर्म्मात्मजस्थाश्च यदा भवन्ति। पापैः प्रदृष्टा न शुभा प्रदृष्टा वर्षाष्टकान्मृत्युकराः प्रदिष्टाः। लग्नपः पापयुक् द्यूनेरिष्टकृद्धोधनस्थितः। नवाब्दैः सखलोऽब्जांशे व्यये चेन्दोः खलेक्षितः। सूर्य्यशुक्रशनीनाञ्च योगो भवति जन्मनि। गुरुदृष्टोऽपि रिष्टाय प्रदिष्टो नववत्सरैः। गजैरङ्कैर्नेत्रनेत्रैर्द्विपक्षैः शरैरेककेनाब्धिभिर्वह्निनेत्रैः। गजाब्जैर्नखैः खगसंख्यैश्च दिग्भिर्विधोर्मेषतो भागवर्षैर्मृतिः स्यात्। कर्कलग्ने गुरौ सेन्दौ ज्ञशुक्रौ केन्द्रगौ यदा। त्रिलाभारिगताः शेषा इहायुरमितं स्मृतम्। आयुषो योगजस्यापि रिष्टं बाधकमत्र हि। तद्बाधकोरिष्टभङ्गः स चेद्बलिकृतो भवेत्। शुभाश्चन्द्रात् षष्ठसप्ताष्टमस्था नो खलान्विताः। रिष्टनाशाय गदिताः प्रणामोऽन्त्यहरेर्यथा। शुभद्रेष्काणगैः सर्वैः शुभैर्युक्तोविधुः शिशोः। रिष्टहा परिपूर्णो वा द्वादशांशे शुभे स्थितः। सम्पूर्णाङ्गः शर्व्वरीनायकश्चेत् सर्वैर्दृष्टोरिष्टहा संप्रदिष्टः। उच्चस्थो वा मित्रभागस्थितो वा चन्द्रारिष्टं नाशयेत् शुक्रदृष्टः। केन्द्रे ज्ञगुरुशुक्राणामेकः कोणेऽथ वीर्य्यवान्। अरिष्टनाशकः केन्द्रे पापोऽपि परमोच्चगः। मित्रराशिगताः पापाः शुभाश्च नवपञ्चमाः। नाशं नयन्ति रिष्टानि कृष्णोरिष्टासुरं यथा। बली जन्मेश्वरोमित्रशुभदृष्टो हि रिष्टहा। स सर्वग्रहदृष्टो हि षष्ठे रिष्टविनष्टिकृत्। वर्गोत्तमे शुभाः सर्व्वे स्वभे चारिष्टहानिदाः। शुभवर्गगता दृष्टाः सद्दृष्टा रिष्टनष्टिदाः। कृत्तिकापुष्यदास्रेषु चन्द्रोवाथ त्रिपुष्करे। पूर्णोवर्गोत्तमगतः स्वीयरिष्टविनाशकृत्। मेषकर्कगतश्चन्द्रः केन्द्रे शुभनिरीक्षितः। अशुभं नाशयत्याशु हरिर्मत्तगजं यथा। शुक्लपक्षे निशायाञ्चेत् कृष्णे जन्म यदा दिवा। शुभाशुभेक्षितश्चन्द्रः षष्ठाष्टस्थोऽवकः शिशोः। व्यतीपातेऽथ गण्डान्ते वैधृतौ रिष्टिसन्ध्ययोः। जातस्य रिष्टं नास्त्येव स्मृतिकर्त्तुर्मतं यथा"। इति चन्द्ररिष्टभङ्गः। "सवीर्य्ये गुरौ लग्नगे रश्मियुक्ते विनाशं तदैवाशुभं सर्व्वमेति"। बलिष्ठैः शुभैस्त्वाशुभैर्वीर्य्यहीनैः शुभर्क्षं तनुः सद्ग्रहैर्वीक्षितं वा। त्रिषड़ेकादशे राहुः शुभदृष्टो यदा भवेत्। मृत्युनाशाय स विभुर्मृत्युञ्जय इवापरः। मेषोक्षकर्कलग्नस्थो राहुश्चाप्युदयो मुनेः। अगस्त्यस्य मुनीनां च सप्तानां रिष्टनाशकः। शीर्षोदयगतैः सर्वैर्मृत्युदोषो विनश्यति। प्रसन्नैः सुखदैश्चापि नभोदिग्वह्निवायुभिः। मृत्युभं ग्रहहीनं चेत् केन्द्रे पूर्णबले शुभे। त्रिंशद्वर्षं तदायुः स्याच्चत्वारिंशच्छुभेक्षिते। गुरुः स्वभे स्वदृक्काणे सप्तविंशतिवर्षकम्। स्वभस्थिताः शुभाश्चन्द्रे स्वोच्चेऽङ्गस्थे खषट्समाः। लग्ने गुरौ शुभैः केन्द्रस्थितैर्मृत्यौ ग्रहोज्झिते। सप्तत्यब्दं भवेदायुरष्टाङ्के तदवीक्षिते। कर्कोऽङ्गगे गुरौ कोणस्थितैः सर्वशुभग्रहैः। अशीतिरायुषः काष्ठा केन्द्रे शुक्रे शतं समाः। सूर्य्ये बलिष्ठे पिण्डायुश्चन्द्रे स्यात्तु निसर्गजम्। लग्नेऽंशायुर्हीनबले त्रिकेऽस्मिन् जीवशर्म्मजम्। नन्देन्दुतत्त्वतिथ्यर्कतिथिस्वगनखा रवेः। वर्षाण्युच्चे ग्रहे नीचे त्वर्द्धं मध्येऽनुपाततः। नखैकद्व्यङ्कधृतयो विंशत्खाच्चा निस-